# Kashyam Kalabhairavaprakatyaprasangavarnanam

# કાશ્યાં કાલભૈરવપ્રાકટ્યપ્રસઙ્ગવર્ણનમ્

## Document Information

Text title : Kashyam Kalabhairavaprakatyaprasangavarnanam

File name : kAshyAMkAlabhairavaprAkaTyaprasangavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 201-261||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશ્યાં કાલભૈરવપ્રાકટ્યપ્રસઙ્ગવર્ણનમ્

- શિવપાર્વતીસંવાદે -

બ્રહ્મોવાચ -

અહમેવાખિલૈઃ પૂજ્યઃ પૂજ્યો મમ ન સર્વથા ।
કિં શૂલી મમ સમ્પૂજ્યઃ પૂજ્યોઽહં શૂલિનો ધ્રુવમ્ ॥ ૨૦૧॥

વેદાઃ સૃષ્ટા મયા સર્વે સૃષ્ટા લોકા મયા પુરા ।
મદન્યઃ સર્જકો લોકે નાસ્તિ પૂજ્યોઽપિ સર્વથા ॥ ૨૦૨॥

ભ્રાન્તા યૂયં ન સન્દેહઃ શૂલિપૂજાપરાયણાઃ ।
પૂજા મમૈવ વિહિતા વેદાસ્તત્ર તુ સાક્ષિણઃ ॥ ૨૦૩॥

પ્રલપન્નેવમેવાન્યદ્વિશ્રાન્તોઽસૌ તદા વિધિઃ ।
તસ્થૌ તતો મહાવિષ્ણુરર્ઘ્યપાણિરુપાગતઃ ॥ ૨૦૪॥

તતોઽભિષિચ્ય માં વિષ્ણુઃ ક્ષીરાજ્યાદિભિરાદરાત્ ।
ચકાર પૂજાં વિવિધાં બિલ્વપત્રાદિભિર્મુદા ॥ ૨૦૫॥

ધૂપદીપાંશ્ચ નૈવેદ્યં ક્ષીરાજ્યદધિમિશ્રિતમ્ ।
દત્વા દદૌ પુનર્દીપાન પુનઃ પુષ્પાઞ્જલિં દદૌ ॥ ૨૦૬॥

પ્રદક્ષિણનમસ્કારાન્ ચકાર તદનન્તરમ્ ।
તતઃ પઞ્ચાક્ષરં શૈવં જજાપ સ જનાર્દનઃ ॥ ૨૦૭॥

તતસ્તં ધ્યાનનિરતં વિધિર્દૃષ્ટ્વા હરિં તદા ।
ઉવાચ વચનં ભ્રાન્તઃ ક્રોધમુત્પાદન્હરેઃ ॥ ૨૦૮॥

અસમ્પૂજ્યૈવ પૂજાર્હં મામયં વિષ્ણુરુદ્ધતઃ ।
શૂલિપૂજાં કરોત્યત્ર ભ્રાન્તોઽયં નાત્ર સંશયઃ ॥ ૨૦૯॥

ઇત્યુદીરિતમાકર્ણ્ય વચનં તદ્વિધેર્હરિઃ ।
પૂજાં સમાપ્ય તદનુ જગાદ વચનં તદા ॥ ૨૧૦॥

વિષ્ણુરુવાચ -
હા હા દુર્ભાગ દુર્બુદ્ધે કિમેત્રં વક્તુમર્હસિ ।
કથં ભ્રાન્તોઽદ્ય જાતોઽસિ શુભં નાદ્ય તુ દૃશ્યતે ॥ ૨૧૧॥

સર્વદેવોત્તમઃ સામ્બઃ શઙ્કરો ભક્તવત્સલઃ ।
સર્વેષામપિ સમ્પૂજ્યઃ તસ્ય પૂજ્યો ન દૃશ્યતે ॥ ૨૧૨॥

તસ્યૈવ પૂજાવિહિતા સર્વવેદેષુ સર્વથા ।
તત્પૂજયૈવ સમ્પ્રાપ્તો મોક્ષો મોક્ષપ્રદઃ શિવઃ ॥ ૨૧૩॥

શિવપૂજા મયા પૂર્વં બહુધૈવ કૃતા મુહુઃ ।
અહં શિવપ્રસાદેન પાલયામ્યખિલં જગત્ ॥ ૨૧૪॥

ઇત્યુક્તવન્તં તં વિષ્ણું ભ્રાન્તોઽસીતિ જગાદ સઃ ।
મત્તોઽન્યો ન હિ સમ્પૂજ્યઃ પૂજ્યોઽહં નાત્ર સંશયઃ ॥ ૨૧૫॥

ભ્રાન્તાઃ સર્વે કથં જાતાઃ પૂજ્યં માં સર્વસાધનૈઃ ।
ન પૂજયન્તિ દુર્વૃત્તા મામ્મિત્યેવં વદસ્થિતઃ ॥  ૨૧૬॥

તદા ક્લેશાન્વિતો વિષ્ણુઃ શઙ્કરં લોકશઙ્કરમ્ ।
તુષ્ટાવ વિવિધૈઃ સ્તોત્રૈરુવાચેદં વચસ્તદા ॥ ૨૧૭॥

શમ્ભો પ્રસીદ દેવેશ ક્લેશાન્દૂરીકુરુષ્વ મે ।
અશૈવં સંહરસ્વૈનમધર્મસ્ય પ્રવર્તકમ્ ॥ ૨૧૮॥

અધર્મવૃત્ત્યા સર્વેઽપિ યાસ્યન્તિ નરકં ધ્રુવમ્ ।
કૃપાલુરસિ દેવેશ વિધિમેનં પ્રણાશય ॥ ૨૧૯॥

અશૈવોઽયં દુરાચારઃ સ્થાપનીયો ન સર્વથા ।
અશૈવશિક્ષા કર્તવ્યા દેવેશ ત્રિપુરાન્તક ॥ ૨૨૦॥

નોચેદધર્મવૃદ્ધિસ્તુ ભવિષ્યતિ ન સંશયઃ ।
અધર્મવૃદ્ધ્યા દેવાનાં દુઃખવૃદ્ધિર્ભવિષ્યતિ ॥ ૨૨૧॥

ઇત્યુક્ત્વા પ્રણતો વિષ્ણુઃ સ ઋષિઃ સંસ્(સર્ષિસઙ્ઘઃ) સ્તુવંસ્તદા ।
પ્રસીદેશ પ્રસીદેશ પ્રસીદેતિ વદન્મુહુઃ ॥ ૨૨૨॥

તદોગ્રરૂપાદનઙ્ઘાન્મત્તઃ શ્રીકાલભૈરવઃ ।
આવિરાસીત્તદા લોકાન્ભીષયન્નખિલાનપિ ॥ ૨૨૩॥

વ્યાપ્યાયં સપ્તપાતાલાનનન્તચરણૈઃ સ્વયમ ।

ભૂર્ભુવઃ સુવરાદીંશ્ચ શિરોઽભિવ્યાપ્ય સંસ્થિતઃ ॥ ૨૨૪॥

દિશો દશવ્યાપ્તહસ્તૈરનન્તૈર્વિવૃતાનનઃ ।
અનન્તસૂર્યપ્રતિમઃ કાલાનલસમપ્રભઃ ॥ ૨૨૫॥

નાનાશસ્ત્રાવૃતાકારો નાનાગન્ધાનુલેપનઃ ।
નાનામાલાવૃતો નાનારત્નાભરણસંવૃતઃ ॥ ૨૨૬॥

અન્તરૂપકૂપેષુ વહન્નગ્નિકણાન્બહૂન્ ।
નિઃશ્વાસપવનૈરગ્નિં વિસૃજન્ રક્તલોચનઃ ॥ ૨૨૭॥

અકાણ્ડપ્રલયાગ્નીનાં સમૂહમિવ સંસ્થિતઃ ।
દૃષ્ટ્વા તં વિસ્મિતાઃ સર્વે દેવાઃ સ ઋષિપુઙ્ગવાઃ ॥ ૨૨૮॥

ચચાલાવનિરુદ્વિગ્ના ચેલુશ્ચ કુલપર્વતાઃ ।
શેષશ્ચકમ્પે સકલૈઃ ફણિભિશ્ચ સમાવૃતઃ ॥ ૨૨૯॥

તન્નિઃશ્વાસમહાવાયુરુત્પાતપવનોઽભવત્ ।
તત્કરાઘાતમાત્રેણ પેતુરુર્વ્યાં ચ તારકાઃ ॥ ૨૩૦॥

પાપત મૂર્ચ્છિતો વિષ્ણુસ્તં દૃષ્ટ્વા ભીમવિક્રમમ્ ।
પેતુર્મુનિવરાસ્સર્વે દેવાશ્ચેન્દ્રપુરોગમાઃ ॥ ૨૩૧॥

ક્ષુબ્ધાઃ સમુદ્રાઃ સર્વેઽપિ ક્ષીરાબ્ધિપ્રમુખાસ્તદા ।
ઉદ્વેલાશ્ચ બભૂવુસ્તે મહાકલ્લોલસઙ્કુલાઃ ॥ ૨૩૨॥

તતસ્તુ ભૈરવો લોકાન્ ભીષયન્નખિલાનપિ ।
પ્રણમ્ય મામુવાચેદં વચનં વિનયાન્વિતઃ ॥ ૨૩૩॥

ભૈરવ ઉવાચ -
શમ્ભો કિં કરવાણ્યદ્ય કાર્યં તે કિમુપસ્થિતમ્ ।
શોષણીયાઃ સુમુદ્રાઃ કિં ક્ષણેનૈવાદ્ય લીલયા ॥ ૨૩૪॥

કિં વા કુલાચલાઃ સર્વે ભક્ષણીયાસ્ત્વદાજ્ઞયા ।
નસ્મીભૂતાશ્ચ કર્તવ્યા દેવાઃ સર્વે કિમીશ્વર ॥ ૨૩૫॥

કિં ભસ્મસાદુપૈત્વીશ સશૈલવનકાનના ।
પૃથિવી સનદી વા મામાજ્ઞાપયતુ શઙ્કર ॥ ૨૩૬॥

મા વિલમ્બં કુરુષ્વેશ કિં વિલમ્બેન શઙ્કર ।
ત્વત્પ્રસાદેન સર્વેષાં નાશકશ્ચ ભવામ્યહમ્ ॥ ૨૩૭॥

મયોગ્રતરરૂપેણ તૂષ્ણીં સ્થાતું ન શક્યતે ।
દેવોત્તમ મહાદેવ હરાજ્ઞાપય માં વિભુમ્ ॥ ૨૩૮॥

એવમુક્તો ભૈરવેણ પ્રણતશ્ચ મુહુર્મુહુઃ ।
તદા બ્રહ્મશિરશ્છેદં કુરુષ્વેત્યુક્તવાનહમ્ ॥ ૨૩૯॥

તતો વિધિં ભૈરવસ્તં દૃષ્ટ્વા પ્રસ્ફુરિતાધરઃ ।
નખાગ્રેણૈવ ચિચ્છેદ શિરાંસિ ચ પપાત સઃ ॥ ૨૪૦॥

તતસ્તસ્ય વિધેશ્છિન્નં પ્રથમં તુ શિરસ્તદા ।
જગામ નાગનિલયં પ્રલપન્સત્વરં શિવે ॥ ૨૪૧॥

તદા તસ્ય શિરો દૃષ્ટ્વા બ્રહ્મણઃ ફણિરાટ્ તદા ।
વિસ્મિતો મુક્તિમેતસ્ય શિરશ્છેદસ્ય કારણમ્ ॥ ૨૪૨॥

ઇદં બ્રહ્મશિરો નૂનં મયા તુ પરિચીયતે ।
બ્રહ્મણો ન શિવાદન્યઃ શાસ્તા દેવેષુ વિદ્યતે ॥ ૨૪૩॥

પ્રાયશો દેવદેવસ્ય મહાદેવસ્ય પૂજનમ્ ।
ન કૃતં બ્રહ્મણા તસ્માચ્છિવેન નિહતો વિધિઃ ॥ ૨૪૪॥

પ્રાયશો બ્રહ્મણા શમ્ભોર્ધિક્કારો વા કૃતો ધ્રુવમ્ ।
નન્દિકેશસ્ય વાઽન્યસ્ય શિવભક્તસ્ય વા ધ્રુવમ્ ॥ ૨૪૫॥

શિવં વા શિવભક્તં વા નન્દિકેશં શિવપ્રિયમ્ ।
યો ધિક્કરોતિ તસ્યેયં ગતિર્ભવતિ સર્વથા ॥ ૨૪૬॥

અન્યથા બ્રહ્મણોઽકાણ્ડે શિરશ્છેદઃ કથં ભવેત્ ।
નાયં પ્રલયકાલશ્ચ બ્રહ્મવિષ્ણ્વીશનાશકઃ ॥ ૨૪૭॥

સમયઃ પ્રલયસ્યાસ્તુ માસ્તુ વાયં તથાપ્યહમ્ ।
કાશીં પ્રતિ ગમિષ્યામિ યત્ર પ્રલયભીર્ન મે ॥ ૨૪૮॥

મહાપ્રલયકાલેઽપિ કાશીસ્થો ન વિનશ્યતિ ।
તતઃ કાશીમહં યાસ્યે યત્ર ન પ્રલયોદ્ભવઃ ॥ ૨૪૯॥

દગ્ધા ભવન્તુ બ્રહ્માદ્યા લોકા દગ્ધા ભવન્તુ ચ ।
યાસ્યેઽહં સર્વથા નિત્યાં કાશીં માહેશ્વરીં પુરીમ્ ॥ ૨૫૦॥

ઇત્યુક્ત્વા ફણિરાટ્છીઘ્રં કાશીં પ્રતિ સમાયયૌ ।

પાહિ પાહિ મહાદેવ પ્રલયાદિતિ સંવદન્ ॥ ૨૫૧॥

સમ્પ્રાપ્ય કાશીં પૂતાત્મા પ્રહૃષ્ટહૃદયઃ ફણી ।
અમન્યત તદાત્માનં કૃતાર્થં ભાગ્યસંશ્રયમ્ ॥ ૨૫૨॥

દૃષ્ટ્વા કાશીં પુરીં શૈવીં શૈવમોક્ષપ્રદાયિનીમ્ ।
સાક્ષાચ્છિવસ્વરૂપેયં દેવાનામપિ દુર્લભા ॥ ૨૫૩॥

કૃપા મયિ મહેશસ્ય સમ્પૂર્ણા તિષ્ઠતિ ધ્રુવમ્ ।
યતોઽતિદુર્લભા કાશી સુલભાઽદ્ય મમાભવત્ ॥ ૨૫૪॥

અતઃ પરં ભયં નાસ્તિ મૃતેરપિ મમ ધ્રુવમ્ ।
યતઃ પ્રાપ્તા મયા કાશી યાં મૃત્યુર્નૈવ પશ્યતિ ॥ ૨૫૫॥

તતઃ સ રત્નપુષ્પાદ્યૈર્વિશ્વેશં માં સનાતનમ્ ।
સમ્પૂજ્ય નિત્યયાત્રાદિ સર્વકર્મ ચકાર સઃ ॥ ૨૫૬॥

આદિભૈરવમભ્યર્ચ્ય ધૂપદીપાદિભિસ્તતઃ ।
કૃત્તિવાસેશ્વરં દ્રષ્ટું પુષ્પપાણિરુપાયયૌ ॥ ૨૫૭॥

શ્રીકાલભૈરવં દૃષ્ટ્વા ભીમરૂપં ભયાનકમ્ ।
ચકમ્પે મૂર્ચ્છિતઃ શેષઃ પપાત પૃથિવીતલે ॥ ૨૫૮॥

–
મયા ચોત્થાપિતો વિષ્ણુસ્તતઃ પૂર્વં સ ઉત્થિતઃ ।
ઇન્દ્રાદયઃ સ ઋષયો (?) મયૈવોત્થાપિતાઃ શિવે ॥ ૨૫૯॥

વિષ્ણુરિન્દ્રઃ ફણિપતિર્દેવાશ્ચાન્યે મુનીશ્વરાઃ ।
દદૃશુશ્છિન્નશિરસં વિધિ તં પતિતં ભુવિ ॥ ૨૬૦॥

–
દેવા ઊચુઃ -
તતો વિષ્ણુસ્સદેવેન્દ્રઃ સઋષિઃ સફણિસ્તથા (?) ।
સ્તોત્રૈરનેકૈઃ સ્તુત્વા ચ (તુષ્ટાવ) ભીમં શ્રીકાલભૈરવમ્ ॥ ૨૬૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કાશ્યાં કાલભૈરવપ્રાકટ્યપ્રસઙ્ગવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૧ । ૨૦૧-૨૬૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 201-261..

Notes:

Śiva શિવ recounts to Pārvatī પાર્વતી; the appearance/manifestation of the formidable Kālābhairava કાલભૈરવ and the subsequent decapitation of Brahmā બ્રહ્મા who brimmed with arrogance due to his role as The Creator, and had entered Kaśī કાશી questioning Viṣṇu વિષ્ણુ as to why He (Viṣṇu વિષ્ણુ) was worshiping Śiva શિવ - when he (Brahmā બ્રહ્મા) as the Creator is the only one worthy of being worshiped. As the terrifying event unfolds and Brahmā બ્રહ્મા has fallen unconscious; Viṣṇu વિષ્ણુ, along with Indra ઇન્દ્ર, Ṛṣi-s ઋષિઃ Phaṇipati ફણિપતિ (Vāsuki વાસુકિ) collectively attempt to eulogize, pacify and appease the disgruntled and vexed Kālābhairava કાલભૈરવ.

Proofread by Ruma Dewan

---

*Kashyam Kalabhairavaprakatyaprasangavarnanam*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*